तस्माद्द्वात्रिंशत्संख्यमित्यादि। अन्तरभावनया त्वेकोनत्रिंशमष्टाविंशमित्यादि। पूर्णं दोर्ज्यां कोटिज्यां त्रिज्यां च प्रकल्प्य प्रथमं खण्डमेवं षष्टिः ६० स्यात्। अथ यदि सैव त्रिज्या चतुर्विंशतिज्याधीनि तदर्थमाह। कोटिजीवाशताभ्यस्तेत्यादि। अत्रापि त्रिज्यार्धमष्टमं ज्यार्धं सा भुजज्या। षोडशं कोटिज्या सा कोटिज्या शतगुणा गोदस्रतिथि(१५२९)भाजिता। या तु दोर्ज्या सा तु निजेन सप्ताङ्कवेदांशेन४६७हीना कार्या। यदि तयोरैक्यं क्रियते तदा नवमं ज्यार्धं भवति। यद्यन्तरं तदा सप्तमं स्यात्। एवं समासभावनया नवमाद्दशमं दशमादेकादशमित्यादि। तथान्तरभावनया सप्तमात् षष्ठं षष्ठात् पञ्चममित्यादि। एवं प्रथमं सप्तांशोनं तत्त्वदस्र२२५मितं भवति। अथवा पूर्णं ० दोर्ज्यां त्रिज्यां च कोटिज्यां प्रकल्प्य साध्यते तथापि तदेव। ततः समासभावनया द्वितीयादीन्यखिलानि भवन्ति। अथ वा त्रिज्यां दोर्ज्यां प्रकल्प्य पूर्णं कोटिज्यां च प्रकल्प्य साध्यते तदा त्रयोविंशमुत्पद्यते तस्मादन्तरभावनया द्वाविंशम् २२। ततोऽप्येकविंशम् २१। एवमखिलान्यपि निष्पद्यन्ते। अथ भावनामाह। चापयोरिष्टयोरित्यादि। इष्टयोश्चापयोर्ये दोर्ज्ये ते कर्णभूमौ स्थाप्ये। तयोरधस्तात् कोटिज्ये च। ततः प्रथमकोटिज्या द्वितीयदोर्ज्यया गुण्या। ततो द्वितीयकोटिज्या प्रथमदोर्ज्यया गुण्या। द्वे अपि त्रिज्यया भाज्ये। फलयोः समासश्चापैक्यभुजस्य ज्या भवति। अन्तरं चापान्तरस्य ज्या भवति। इयं सिद्धज्यातोऽन्यज्यासाधने भावना। तद्यथा। तुल्यभावनया प्रथमज्यार्धस्य प्रथमज्यार्धेन सह समासभावनया द्वितीयं, द्वितीयस्य द्वितीयेनैवं चतुर्थमित्यादि। अथातुल्यभावनया द्वितीयतृतीययोः समासभावनया पञ्चमम्। अन्तरभावनया प्रथमं स्यादित्यादि। अथेष्टव्यासार्धे ज्याज्ञानार्थमाह। आद्यज्याचापभागानामित्यादि। यावद्भिरंशैरेका ज्या लभ्यते ते आद्यज्याचापांशाः। प्रतिभागज्यकाविधिरिति। त्रिसप्तपञ्चभि ५७३ र्भक्तेत्यादिना प्रागुक्तप्रकारेणैकभागस्य ज्यामानीय तद्भावनातो भागद्वयस्यैवं तेषां भागानां ज्या साध्या साभीष्टत्रिज्यया हृता वस्वनलाब्धिवह्निभि ३४३८ र्भक्ता प्रथमज्या स्यात्। तस्यास्तयैव सह भावनया द्वितीयाद्याः सिध्यन्ति" प्रमिताक्षरा।

**जीवातु** पु॰ जीवयति जीव–णिच्–कर्त्तरि आतु, जीवत्यनेन जीव–करणे वा आतु। १अन्ने २जीवनौषधे ३मृतसंजीवनौषधे च भावे आतु ।४जीवने। मेदि॰ "रे हस्त ! दक्षिण ! मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम्" उत्तरच॰। "आर्त्त्या पुनर्जीवातवे न मर्त्तवे" ताण्ड्य॰ब्रा॰१।५।१८। जीवितुमिति भाष्योक्तेः तवेप्रत्ययान्तमित्यन्ये तथा च जीव–तुमर्थे तवे वा॰ दीर्घः। न मर्त्तवे इति साहचर्यात् जीवितुमित्यर्थकता तच्च तवेप्रत्ययान्ततयैव सिध्यतीति बोध्यम्।

**जीवातुमत्** पु॰ जीवातु+मतुप्। आयुष्कामेष्टौ देवताभेदे "आयुष्कामेष्ट्यां जीवातुमन्तौ" आश्व॰श्रौ॰ २।१०। २। "जीवातुमन्तौ सव्योपर्य्युपस्या" २।१८।१६।

**जीवात्मन्** पु॰ जीवति जीव–अच् कर्म॰। प्राणवत्त्वाद्युक्ते आत्मनि प्राणिनि। "संयोगो योग इत्युक्तो जीवात्मपरात्मनोः" योगशा॰। "जीवात्मन् ! पश्य भद्रं ते मातरं पितरञ्च ते" भाग॰ ६।१६।२।

**जीवादान** न॰ ६त॰। "अयोगस्तूभयोराध्मानं परिकर्त्तिका परिस्रावाः प्रवाहिका हृदयोपसरणमङ्गग्रहोऽभियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्तीति" सुश्रुतोक्ते वैद्यनिमित्ते व्यापद्भेदे तच्च वमनविरेचनव्यापद्भेदः यथोक्तं तत्रैव

"अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः। वैद्यातुरनिमित्तं वमनं च पञ्चदशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्ध्वं विरेचनस्येति पृथक्। सामान्यमुभयोः सावशेषौषधत्वं जीर्णौषधत्वं हीनाधिदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावः प्रवाहिकाहृदयोपसरणं विबन्ध" इति।

**जीवाधार** पु॰ ६त॰। हृदये हेमच॰। "हृदयं तस्मादृदयम्" क्षा॰ उ॰ जीवस्य हृदयाधारत्वोक्तेस्तथात्वम्।

**जीवान्तक** पु॰जीवमन्तयति अन्ति–नामधा॰ण्वुल्। जीवनार्थं प्राणिनाशके शाकुनिके अमरः२प्राणिनाशकमात्रे त्रि॰।

**जीवार्द्धपिण्डक** पु॰सूर्यसि॰परिभाषिते चक्रस्थराशिकलानां १८०० शतानामष्टमे भागे २२५यथाह सू॰ सि॰ "राशिलिप्ताष्टमो भागः प्रथमं ज्यार्द्धमुच्यते" तत्तद्विभक्तं लब्धोनमिश्रितं तद् द्वितीयकम्। आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः। खण्डकाः स्युश्चतुर्विंशज्यार्द्धपिण्डाः क्रमादमी"। "एकराशिकलानामष्टादशशतानामष्टमोऽंशस्तत्त्वाश्विमितः२२५प्रथममाद्यं ज्यार्द्धं सम्पूर्णजीवार्द्धपिण्डकः कथ्यते तदभिज्ञैः" रङ्ग॰। अत